दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लनवमी
आषाढः 09 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-241 | 1 | जून 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


2 उत्तरप्रदेशस्य लखनऊनगरस्य अलीगंजक्षेत्रे भीषणाग्निकाण्डे १६ ततः २५ वर्षायुवर्गस्य प्रायः पञ्चदश जनाः (मुख्यतः छात्राः) मृताः

3 २०१६ तमवर्षात् पूर्वं सेवानिवृत्तेभ्यः कर्मचारिभ्यः जुलाईमासे प्राप्स्यते अवशिष्टम् धनम्, सर्वकारेण प्रसारिताः आदेशाः

4 केन्द्रीयसंस्कृतविश्वविद्याल यस्य भोपालपरिसरे द्वादशस्य अन्तर्राष्ट्रिय-योगमहोत्सवस्य आयोजनम्

## यू. के. देशस्य प्रधानमन्त्री कीर स्टार्मरः प्रधानमन्त्रिणः पदात् त्यागपत्रस्य घोषणाम् अकरोत्



यू. के. देशस्य प्रधानमन्त्री कीर स्टार्मरः स्वदलस्य वर्धमानस्य आन्तरिकद्वन्द्वे डाउनिङ्ग् स्ट्रीट् इत्यत्र स्वस्य कार्यावधिं समाप्य, लेबर पार्टीति दलस्य नेतुः पदात् सहैव प्रधानमन्त्रिणः पदात् त्यागपत्रस्य घोषणाम् अकरोत्। स्वस्य त्यागपत्र-वक्तव्ये, श्रीस्टार्मरः द्विवर्षात् प्राक् डाउनिङ्ग् स्ट्रीट् इत्यत्र स्वस्य आगमनं जीवनस्य गौरवपूर्णतमं क्षणत्वेन स्मृतवान्, कोटिशः जनानां जीवनं परिवर्तयितुं लक्ष्यं स्वीकृत्य राजनीतौ प्रविष्टवान् इति सः उक्तवान्।

## आर्थिक-सम्बन्धान् इतोऽपि दृढीकर्तुं विदेशमन्त्री डॉ. एस्. जयशङ्करः स्वकीय-समकक्षेन सह चर्चार्थं मङ्गोलिया-देशं सम्प्राप्तवान्



विदेशमन्त्री डॉ. एस्. जयशङ्करः द्विविसीय प्रवासाय मङ्गोलिया-देशं सम्प्राप्तवान्, यस्य उद्देश्यं द्वयोः देशयोः मध्ये विशिष्ट-सहभागित्वम् इतोऽपि सुदृढं करणीयम् अस्ति। एकस्मिन् सामाजिकपटले एकेन सन्देशेन डॉ. जयशङ्करः अवोचत् यत् अहं मङ्गोलिया-देशे निष्कर्षयुत-संवादाय आशावान् अस्मि । अस्य प्रवासस्य अन्तर्गतं विदेशमन्त्री मङ्गोलिया-देशस्य शीर्षनेतृभिः सह मेलिष्यति, अपि च स्वकीय-समकक्षया विदेशमन्त्रिण्या बी. बाट्टसेटसेग वर्यया सह चर्चा करिष्यति। स्वकीय-भ्रमणस्य द्वितीये चरणे, विदेशमन्त्री बुधवासरे दक्षिणकोरिया-देशं प्राप्स्यति। तत्र सः दक्षिणकोरियायाः विदेशमन्त्रिणा चो ह्युन महोदयेन सह द्विपक्षीय वार्ता विधास्यति। अनेन सहैव, सः गुरुवासरे 'जेजू' द्वीपे आयोज्यमाने 'जेजू फोरम फॉर पीस एण्ड प्रोस्पेरिटी' इत्याख्ये सम्मेलने मुख्यभाषणम् अपि प्रदास्यति।

## सुरक्षा-समाह्वानानां विषये चर्चयितुं नवदिल्ल्याम् 'ब्रिक्स' राष्ट्रीय-सुरक्षा-परामर्शदातृणां सम्मेलनम् आरब्धम्





नवदिल्ल्यां ब्रिक्स सङ्घटनस्य राष्ट्रिय-सुरक्षा-परामर्शदातृणां द्विदिवसीयम् उपवेशनम् गतदिने आरब्धम्। भारतस्य राष्ट्रिय-सुरक्षा-परामर्शदातृ अजीत डोभालस्य अध्यक्षतायां प्रचलन्त्याम् अस्यां गोष्ठ्याम् अस्य समूहस्य एकादश सदस्यदेशानां सुरक्षाप्रमुखाः भागं भजन्ति। एतेषु सदस्यदेशेषु भारत, ब्राजील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, ईरान, रूस, साउदी अरब, दक्षिण अफ्रीका तथा संयुक्त अरब अमीरात सम्मिलिताः सन्ति। अवधेयं यत् षविंशत्युत्तर द्विसहस्रतमे वर्षे भारतेन चतुर्थवारं 'ब्रिक्स' सङ्घटनस्य अध्यक्षता प्राप्ता अस्ति, यस्य अन्तर्गतमेव एतत् आयोजनं संभवति।

अजीत डोभालः अद्य ईरान-देशस्य 'एस.एन.एस.सी.' संस्थायाः रक्षाविषयक-उपसचिवेन गदीर निजामीपुर इत्यनेन सह द्विपक्षीय-मन्त्रणां कृतवान्। विदेश मन्त्रालयानुसारम्, उभयपक्षतः पश्चिम एशिया क्षेत्रस्य वर्तमान स्थितेः समीक्षा, 'ब्रिक्स' मञ्चस्य अन्तर्गतं सहयोगविषये तथा भारत-ईरान-द्विपक्षीय-सम्बन्धे चर्चा अभवत्। अस्मिन्नेव क्रमे, श्री डोभालः इथियोपिया-देशस्य 'राष्ट्रिय गुप्तचर एवं सुरक्षा सेवा' संस्थायाः विश्लेषण-कार्यकारि-निदेशकेन मिलियन लेमा तादेसे महोदयेन सह अपि अमिलत्।

## पश्चिमबङ्गे भाजपा-नेतृत्वे सर्वकारेण प्रप्रथमं पूर्णं अर्थसंकल्पनापत्रम् उपस्थापितम्



**आयव्ययके सामाजिक-कल्याणं, आधारभूत संरचना-विकासं, आजीविका-सृजनं समेत्य अनेकाः महिला-केन्द्रित योजनाः सन्ति घोषिताः**

हिमसंस्कृतवार्ता। भाजपानेतृत्वे पश्चिमबङ्गप्रशासनेन अद्य प्रवर्तमान-वित्तीयवर्षस्य कृते स्वीयं प्रथमं पूर्ण-अर्थसंकल्पनापत्रं प्रस्तुतम्। अस्मिन् पत्रे सामाजिक-कल्याणम्, आधारभूत संरचना-विकासः, वृत्ति-सृजनं तथा महिला-केन्द्रित-योजनाः विशेषरूपेण प्राधान्यं प्राप्ताः सन्ति। बंगालस्य वित्तमन्त्री स्वपन दासगुप्ता सप्तत्युत्तरषट्सहस्र-कोटि-रूप्यकाणां अर्थसंकल्पनापत्रम् उपस्थापयन् एतत् विकसित-बङ्गाल-निर्माणस्य मार्गचित्रमिति अवदत्। तेन स्पष्टीकृतं यत् राज्यस्य उपरि वर्तमानकालीनं ऋणं अष्ट लक्षकोटिरूप्यतोप्यधिकम् अस्ति, अतः वित्तीय-अनुशासनं अस्माकं अत्यंतं मुख्या प्राथमिकता अस्ति। अर्थसंकल्पनायाः प्रमुखासु घोषणासु विद्यते वृत्यवसराः। राज्ये रिक्त- एकलक्ष सर्वकारीय-पदेषु नियुक्तिं करिष्यते, यस्मिन् विंशतिसहस्र आरक्षक पदानि तथा पंचाशत् सहस्र शिक्षक-पदानि सम्मिलितानि सन्ति। एतेषु रिक्तेषु पदेषु त्रयस्त्रिंशत् प्रतिशतं स्थानं महिलाभ्यः आरक्षितं भविष्यति, सहैव दश प्रतिशतं अतिरिक्त-आरक्षणम् अग्निवीरेभ्यः निर्धारितं कृतम् ।

## सुभाषितम्

**सत्यं तीर्थं, क्षमा तीर्थं,**
**तीर्थमिन्द्रियनिग्रहः।**
**सर्वभूतदया तीर्थं,**
**तीर्थं च प्रियवादिता।।**
**ज्ञानं तीर्थं, तपस्तीर्थं,**
**कथितं तीर्थसप्तकम्।।**
**(स्कन्द महापुराण, काशीखण्ड)**

अर्थात्- सत्य, क्षमा, इन्द्रियनिग्रह, सभी प्राणियों पर दया, प्रिय वाणी बोलना, ज्ञान तथा तप- यह तीर्थसप्तक कहा गया है।






## असम-मेघालय राज्ययोः कृते अति वृष्टेः रेड-अलर्ट इति रक्त उद्षोषणा उद्घोषिता

भारतीय-ऋतु-विभागेन असम-मेघालय राज्ययोः कृते अति वृष्टेः रेड-अलर्ट इति रक्त उद्घोषिता अस्ति। विभागेन अद्य पर्यन्तं उप-हिमालयी-पश्चिमबङ्ग, कर्नाटक, तेलंगाना, केरलम्, गोवा, ओडिशा तथा देशस्य उत्तर-पूर्वीय-भागस्य पृथक् पृथक् स्थानेषु अति वृष्टेः पूर्वानुमानम् अपि ख्यापितम्। अनेन सहैव, विभागेन अद्य हरियाणा, चण्डीगढ़, दिल्ली, पञ्जाब, हिमाचलप्रदेश, उत्तराखण्ड, मध्यप्रदेश, महाराष्ट्र, अण्डमान-निकोबार द्वीपसमूह, जम्मू-कश्मीर तथा लद्दाख क्षेत्रेषु विद्युत्-गर्जनं समेत्य झञ्झावातः तथा तीव्र प्रचण्डवायोः सम्भावना च व्यक्तीकृता।

## रक्षा मन्त्री राजनाथ सिंहः नवदिल्ल्यां इस्रायल-देशस्य रक्षा-मन्त्रालयस्य पूर्व-महानिदेशकेन, सेवानिवृत्तेन मेजर जनरलेन अमीर बराम महोदयेन सह अमिलत्।



रक्षा-मन्त्रालयेन सामाजिक-माध्यमस्य (सोशल मीडिया) सन्देशे सूचितं यत् श्री बराम महोदयः श्री राजनाथ सिंहं न्यवेदयत् यत् इस्रायल-देशः द्वयोः देशयोः विशेष-रणनीतिक-सहभागितायां परस्परं रक्षा-सहयोगं वर्धयितुं कटिबद्धः अस्ति। अस्यां उपवेशने (बैठक) रक्षा सचिवः राजेश कुमार सिंहः, भारते इस्रायल-देशस्य राजदूतः रूवेन अजारः अन्ये च अधिकारिणः उपस्थिताः आसन्। श्री अजारः अवदत् यत् इस्रायल-भारतौ संयुक्ताः परियोजनाः रचयतः, याभिः द्विपक्षीय-भागीदारी अधिका सुदृढा भविष्यति। फरवरी-मासे, प्रधानमन्त्रिणः नरेन्द्र मोदिनः द्विदवसीय-इस्रायल-यात्रायाः समये श्री मोदिनः इस्रायल-देशस्य प्रधानमन्त्रिणः बेन्यामिन नेतन्याहू महोदयस्य च मध्ये सम्भाषणे परस्पर-सम्बन्धान् विशेष-रणनीतिक-सहभागितायाः स्तरं यावत् वर्धयितुं सहमतिः अभवत्। उभौ नेतारावपि भारत-इस्रायल्योः मध्ये सहयोगं अधिकं गतिशीलं कर्तुं चर्चां अकुरुताम्।

## कार्मिक-लोकशिकायत-पेंशन-विभागस्य राज्यमन्त्री डॉ. जितेन्द्र सिंहः नवदिल्ल्यां 'आईएएस ई-सिविल सूची २०२६' इत्यस्य लोकार्पणं कृतवान्



कार्मिक-लोकशिकायत-पेंशन-विभागस्य राज्यमन्त्री डॉ. जितेन्द्र सिंहः नवदिल्ल्यां 'आईएएस ई-सिविल सूची २०२६' (IAS E-Civil List 2026) इत्यस्याः लोकार्पणं कृतवान्। अस्मिन् अवसरे सः अवदत् यत् डिजिटल-मञ्चः प्रशासनिक-योजनायाः, प्रतिभान्वेषणं, मानव-संसाधनानां च प्रभावी-उपयोगस्य एकं महत्त्वपूर्णं साधनं अभवत्। डॉ. सिंहः अवदत् यत् मुद्रित-प्रकाशनेभ्यः डिजिटल-मञ्चं प्रति गमनं 'डिजिटल इण्डिया' इत्यस्य सङ्कल्पस्य (विजन) अनुरूपम् अस्ति, एतत् च सार्वजनिक-प्रशासनस्य आधुनिकीकरणस्य दिशि सर्वकारस्य प्रयत्नान् दर्शयति। मन्त्रालयस्य अनुसारं 'आईएएस ई-सिविल सूची २०२६', सिविल-सूच्याः एकसप्ततितमं (७१तमं) संस्करणम् अस्ति तथा च पीडीएफ ई-पुस्तक (PDF E-Book) रूपेण जारीकृतं षष्ठं (६तमं) संस्करणम् अस्ति।अस्यां ई-सिविल-सूच्यां आईएएस-अधिकारिणां दलस्य (बैच), संवर्गस्य (कैडर), वर्तमान-नियुक्तेः, वेतन-स्तरस्य, शैक्षणिक-योग्यतायाः, सेवानिवृत्तेः तिथेः च सह विस्तृत-सूचना उपलब्धा अस्ति। अस्याम् संवर्गानुसारं (कैडरवार) अधिकारिणां सङ्ख्या, आगामिषु पञ्चसु वर्षेषु सेवानिवृत्तानां भवितृणाम् अधिकारिणां विवरणं तथा च १९६९ वर्षात् सिविल-सेवा-परीक्षायाः माध्यमेन नियुक्तानाम् आईएएस-अधिकारिणां सूचना अपि सम्मीलिता अस्ति।

# राज्यसर्वकारेण ३३३६ कोटिरूप्यकाणां विद्युत्-परियोजनानां कार्यान्वयन-सहमतिः हस्ताक्षरिता

हिमसंस्कृतवार्ताः — शिमला। राज्यसर्वकारेण अस्मिन् वर्षे प्रायः ३३३६ कोटिरूप्यकाणां व्यययुक्ताः २७८ मेगावाट-क्षमतायाः १९ जलविद्युत्-परियोजनानां कार्यान्वयन-सहमतिः हस्ताक्षरिताः। एतेषु ९ मेगावाट-क्षमतायाः सोयल डाशल, ६ मेगावाट-क्षमतायाः खौली-२, ९ मेगावाट-क्षमतायाः ग्रामांग, १० मेगावाट-क्षमतायाः उमली, २४ मेगावाट-क्षमतायाः भरमौर चरण-१, २१ मेगावाट-क्षमतायाः भरमौर चरण-२, २२.५ मेगावाट-क्षमतायाः हरसर चरण-२, १९ मेगावाट-क्षमतायाः हरसर चरण-३, २४ मेगावाट-क्षमतायाः टुंडह चरण-२, १८ मेगावाट-क्षमतायाः जंगलिक, १५ मेगावाट-क्षमतायाः रूपिन चरण-२, १७ मेगावाट-क्षमतायाः दुनाली-१ एवं २, १२ मेगावाट-क्षमतायाः जरी, १८ मेगावाट-क्षमतायाः तोरल कुंडली, १५ मेगावाट-क्षमतायाः टुंडन, १० मेगावाट-क्षमतायाः कोट डोगरी, ८ मेगावाट-क्षमतायाः अप्पर कुर्मी, ११ मेगावाट-क्षमतायाः कलाल खोल तथा च ९.६ मेगावाट-क्षमतायाः मेलन-विद्युत्परियोजनाः सम्मिलिताः सन्ति। राज्यसर्वकारेण एतदपि प्राप्तं यत् पूर्वम् आवंटितानां १५ विद्युत्-परियोजनानां निर्माणकर्तृभिः परियोजनायाः कार्यान्वयने कोऽपि विशेषः रसः न दर्शितः, अतः सर्वकारेण एतासां परियोजनानां आवंटनं निरस्तीकृतम्। सर्वकारः पुनः एतासां तीव्र-कार्यान्वयनार्थं अन्ताराष्ट्रियस्तरे निविदाः (टेंडर्स) आमन्त्रयितुं प्रयतते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः ऊर्जाविभागस्य उपलब्धिभ्यः विभागस्य अधिकारिभ्यः कर्मचारिभ्यश्च वर्धापनानि दत्तवान्। सः अवदत् यत् राज्ये विद्यमानायाः विद्युत्क्षमतायाः दोहनाय सर्वकारः दृढसङ्कल्पः अस्ति। तेन ऊर्जाविभागस्य अस्याः क्षमतायाः तीव्रदोहनाय उत्थापितानां पदक्षेपाणां प्रशंसा कृता। सः अकथयत् यत् प्रदेशे ऊर्जाक्षेत्रस्य सम्बर्धनाय सर्वकारेण स्वकीय-ऊर्जानीतौ संशोधनं कृत्वा २५ मेगावाट-क्षमतापर्यन्तानां जलविद्युत्परियोजनानां 'स्वत्वशुल्क' दरेषु परिवर्तनं विधाय ४० वर्षेभ्यः एकसमानं १२ प्रतिशतं कृतम् अस्ति। तेन कथितं यत् १५० मेगावाट-क्षमतायाः टिडोंग चरण-१ जलविद्युत्परियोजनायाः निर्माणकार्यं पूर्णं जातम्। राज्यसर्वकारेण भू-तापीय (जियो थर्मल) विद्युत्परियोजनायाः अन्वेषणाय विकासाय च 'जियो ट्रॉपी इण्डिया प्राइवेट लिमिटेड' इत्यनया सह सहमतिज्ञापने हस्ताक्षरं कृतम्। प्रदेशे विद्यमानायां प्रायः २४००० मेगावाट-विद्युत्क्षमतायाम् राज्येन १२५८८ मेगावाट-क्षमतायाः १८९ परियोजनानां निर्माणकार्यं पूर्णं कृतमस्ति।



सः अवदत् यत् १५२८ मेगावाट-क्षमतायाः ५४ परियोजनाः निर्माणाधीनाः सन्ति तथा च ७५३९ मेगावाट-क्षमतायाः ५२६ परियोजनाः स्वीकृतये विभिन्नेषु चरणेषु वर्तन्ते। मुख्यमन्त्री अवदत् यत् वर्तमान-राज्यसर्वकारः विद्युत्क्षमतायाः दोहनाय सर्वोपरि प्राधान्यं ददाति, येन हिमाचलप्रदेशः आर्थिकरूपेण समृद्धः विधातुं शक्येत। सः अवदत् यत् सर्वकारः एतासु परियोजनासु प्रदेशस्य हितानि सुरक्ष्य एव सहमतिज्ञापनं करोति।

## उत्तरप्रदेशस्य लखनऊनगरस्य अलीगंजक्षेत्रे भीषणाग्निकाण्डे १६ तः २५ वर्षायुवर्गस्य प्रायः पञ्चदश जनाः (मुख्यतः छात्राः) मृताः



उत्तरप्रदेशस्य लखनऊनगरस्य अलीगंजक्षेत्रे गतदिने अपराह्णे एकस्मिन् भीषणाग्निकाण्डे १६ तः २५ वर्षायुवर्गस्य प्रायः पञ्चदश जनाः (मुख्यतः छात्राः) मृताः। अग्निः अलीगंजस्य पुरनियाक्षेत्रे एकाप्यणस्य (दुकानस्य) उपरि सञ्चाल्यमाने एकस्मिन् सञ्जीवकला (एनिमेशन) प्रशिक्षणकेन्द्रे प्रज्वलितः, येन छात्रेषु भीतिः व्याप्ता। षट् छात्राः आहताः अभवन्, ये लखनऊनगरस्य 'केजीएमसी' चिकित्सालये प्रवेशिताः सन्ति। अधिकांशतः मृत्यवः श्वासरोधेन अभवन्।

**अग्निकाण्डस्य विवरणम्**

इदमवगतं यत् अग्निः संस्थायाः भवनस्य अन्तः प्रज्वलितः, ततः च वेगेन प्रसृतः, येन अन्तः स्थिताः जनाः पाशबद्धाः अभवन्। एषः एकः वाणिज्यिकसङ्कुलः आसीत्, यस्मिन् शिक्षणकेन्द्रं, क्रीडाक्षेत्रं विविधाः आपणाः च आसन्। अग्निशामकदलानि, आरक्षकाः, मण्डलप्रशासनस्य अधिकारिणः च घटनास्थलं त्वरितं प्राप्य उद्धारकार्यं निष्कासनकार्यं च आरब्धवन्तः। केचन जनाः प्रथमतलात् कूर्दनं कृत्वा स्वप्राणान् रक्षितुं प्रयतितवन्तः।

**प्रशासनस्य प्रतिक्रिया**

अग्निशामकाः भित्तिं भित्त्वा भवनस्यान्तः प्रविष्टाः। माध्यमैः सह सम्भाषणे उत्तरप्रदेशस्य उपमुख्यमन्त्री ब्रजेश पाठकः अवदत् यत्— राज्यस्य आरक्षकमहानिदेशकस्य (DGP) तथा च अपरमुख्यसचिवस्य अध्यक्षतायां एका उच्चस्तरीया समितिः अस्य प्रकरणास्यान्वेषणं करिष्यति, अग्निकाण्डस्य कारणानि च ज्ञास्यति, येन भविष्ये ईदृशी घटना पुनः न भवेत्। मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत् दोषिषु किमपि कारुण्यं न प्रदर्शिष्यते (अपराधिनः न त्यक्ष्यन्ते)। सः स्वस्य अलीगढ-फिरोजाबादमण्डलयोः भ्रमणम् अपूर्णमेव त्यक्त्वा लखनऊनगरं प्रत्यागतवान्। सः दुर्घटनास्थलस्य निरीक्षणं कृतवान्, चिकित्सालये गत्वा आहतान् अपि अमिलत्।

**शोक-संवेदना**

राष्ट्रपतिः द्रोपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र मोदी च अस्यां घटनायां गभीरं दुःखं प्रकटितवन्तः।

# २०१६ तमवर्षात् पूर्वं सेवानिवृत्तेभ्यः कर्मचारिभ्यः जुलाईमासे प्राप्स्यते अवशिष्टम् धनम्, सर्वकारेण प्रसारिताः आदेशाः



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशसर्वकारेण वर्ष २०१६ तः पूर्वं सेवानिवृत्तेभ्यः कर्मचारिभ्यः पारिवारिक- पेंशनधारकेभ्यश्च महदाश्रयं प्रदाय तेषां पेंशन- संशोधनेन सम्बद्धस्य अवशिष्टस्य 'एरियर' धनस्य भुक्तिः जुलैमासे कर्तुं निर्णयः गृहीतः। वित्त (पेंशन) विभागेन सोमवासरे प्रसारितेन कार्यालयज्ञापनेन (ऑफिस मेमो) अस्मिन् सन्दर्भे आदेशाः कृताः। प्रधानसचिवेन (वित्तम्) प्रसारिताः एते आदेशाः सर्वान् प्रशासनिकविभागान्, मण्डलायुक्तान्, सम्बद्धान् अधिकारिणश्च प्रति प्रेषिताः सन्ति।आदेशानुसारं १ जनवरी २०१६ तः प्रभाविणः पेंशन तथा च पारिवारिकपेंशन-संशोधनस्य अन्तर्गतं अधुना यावत् विभिन्नेषु अंशेषु प्रदिष्टात् 'एरियर' धनात् परं अवशिष्टा सम्पूर्णा राशिः जुलैमासे विमोक्ष्यते । अनेन सह एव प्री-२०१६ (२०१६-पूर्व) पेंशनधारकाणां पारिवारिकपेंशनधारकाणां च सर्वेषां प्रलम्बितानां (लंबित) एरियर-धनानां भुगतानं १०० प्रतिशतं पूर्णं भविष्यति, कोऽपि भागः अवशिष्टः न स्थास्यति। वित्तविभागेन स्पष्टीकृतं यत् पूर्वं प्रदत्तानां अन्तरिम-आश्रयस्य चतुर्णाम् अंशानां, महार्घता-आश्रयस्य (डीआर) १२ अंशानां राशिः च सकल-एरियर धने समायोजयिष्यते।

समायोजनान्तरं या शुद्धा राशिः अवशिष्येत, सा एव पेंशनधारकेभ्यः प्रदास्यते। आदेशेषु एतदपि कथितं यत् यदि कस्यचित् पेंशनधारकस्य अथवा पारिवारिकपेंशनधारकस्य कृते अतिरिक्ता राशिः प्रदत्ता अस्ति, तस्य च प्रतिप्राप्तिः भवितव्या वर्तते, तर्हि सा अपि प्रदीयमानात् एरियर-धनात् समायोजयिष्यते। तदनन्तरम् अवशिष्टायाः राशेः भुक्तिः विधास्यते। सर्वकारेण सर्वान् पेंशन- वितरण-प्राधिकारिणः (पीडीए) बैंकांश्च निर्देशः दत्तः यत् जुलाई २०२६ तमवर्षस्य अवधौ एरियर- राशेः भुगतानं सम्बद्ध- पेंशनधारकेभ्यः पारिवारिक-पेंशनधारकेभ्यश्च सुनिश्चितं क्रियेत।

# उच्चन्यायालयेन ५ राज्यवनसेवाधिकारिणः भारतीयवनसेवायां समावेष्टुं दत्ता अनुमतिः




हिमसंस्कृतवार्ताः — शिमला।राज्य-उच्चन्यायालयेन राज्यसर्वकाराय ५ राज्यवनसेवाधिकारिणः (स्टेट फॉरेस्ट सर्विस ऑफिसर्स) भारतीयवनसेवायां (इंडियन फॉरेस्ट सर्विस) समावेष्टुम् अनुमतिः प्रदत्ता। राज्यसर्वकारेण न्यायालयातं वर्षे २००९ तमे वर्षे राज्यवनसेवायां नियुक्तानां/पदोन्नतानां ५ राज्यवनसेवाधिकारिणां भारतीयवनसेवायां समावेशार्थम् अनुमतिः याचिता आसीत्। न्यायाधीशेन जियालालभारद्वाजेन राज्यसर्वकारस्य आवेदनं स्वीकृत्य मुख्यप्रकरणस्य उपरि श्रवणं २४ जून् दिनाङ्के निर्धारितुम् आदेशाः दत्ताः। याचिकायाम् कथितं आसीत् यत् याचिकाकर्तारः २०११, २०१२, २०१३ तमेषु वर्षेषु 'एच.पी.एफ.एस.' (HPFS) रूपेण नियुक्तानां/पदोन्नतानां अधिकारिणां मध्ये ज्येष्ठतायाः (सीनियोरिटी) अधिकारं कुर्वन्तः सन्ति, यत्रैव राज्यसर्वकारः अधुना केवलं तेषाम् एच.पी.एफ.एस. अधिकारिणां विषये विमृशति ये २०२६ तमे वर्षे 'आई.एफ.एस.' (IFS) मध्ये समावेष्टव्याः सन्ति तथा च ये २००९ तमे वर्षे एच.पी.एफ.एस. रूपेण नियुक्ताः/पदोन्नताः आसन्। न्यायालयेन एतान् तथ्यान् ध्यात्वा २००९ तमे वर्षे एच.पी.एफ.एस. रूपेण नियुक्तानां/पदोन्नतानां राज्यवनसेवाधिकारिणां भारतीयवनसेवायां समावेशस्य प्रस्तावं प्रस्थापयितुम् अनुमतिः प्रदत्ता।न्यायालयेन आदेशे कथितं यत् राज्यसर्वकाराय केवलं २००९ तमे वर्षे एच.पी.एफ.एस. रूपेण नियुक्तानां/पदोन्नतानां राज्यवनसेवाधिकारिणां भारतीयवनसेवायां समावेशप्रक्रियाम् आरब्धुम् अनुमतिः भविष्यति। उल्लेखनीयं वर्तते यत् उच्चन्यायालयेन १ जुलै २०२४ तमे दिनाङ्के पारितादेशस्य अन्तर्गतं वनविभागे अधिकारिणां पदोन्नतिषु (प्रमोशन) स्थगनस्य (रोक लगाने के) आदेसाः प्रसारिताः सन्ति तथा च एतत् स्पष्टीकृतं यत् यदि कापि पदोन्नतिः करणीया अस्ति, तर्हि सा न्यायालयस्य अनुमतिं विना न क्रियेत।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**नन्दिनी-** अद्य मया एका विचित्रा वार्ता श्रुता। पश्चिमबङ्गे वन-अधिकारिभिः गजैः सह योग- अभ्यासः कृतः।

**काव्या-** नमस्ते नन्दिनि। गजानां योगः तु अतीव मोदकरः अस्ति! गजानां मनः शान्तं स्यात्।

**काव्या-** किन्तु मया अन्या काचित् वार्ता पठिता। चीने कश्चित् यन्त्र-मानवः विद्युन्-मूल्यस्य कृते मार्ग-पार्श्वे भिक्षा-याचनं कृतवान् अस्ति।

**नन्दिनी-** सत्यम्, यन्त्र-मानवस्य भिक्षा-याचनं तु अतीव विस्मयजनकं वर्तते। यन्त्राणाम् अपि धन-आवश्यकता जाता!

**नन्दिनी-** अपरं च, कश्चित् अधिकारी स्व- कर्मचारिणे अवकाश-स्वीकृतिपत्रं प्रेषितवान् अस्ति। किन्तु तस्मिन् कृत्रिम-बुद्धेः सूचना अपि अज्ञानेन लिखिता।

**काव्या-** हा हा! सः अधिकारी पत्रं न शोधितवान् अस्ति। कृत्रिम-बुद्धिः अपि तम् उपहसितवती अस्ति।

**काव्या-** इदानीं बेङ्गलूरु-नगरे कश्चित् अतीव विचित्रः अलिन्द-शौचालयः दृष्टः। तत्र भित्तिः एव नास्ति!

**नन्दिनी-** अहो! भित्ति-रहितः शौचालयः अतीव लज्जाकरः अस्ति। जनानां गोपनीयता तु नष्टा जाता।

**नन्दिनी-** एतादृश्यः वार्ताः संसारस्य वैचित्र्यं दर्शयन्ति। पुनर्मेलिष्यामः!

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# मण्डीमण्डलस्य द्वयोः सर्वकारीय-स्नातक-महाविद्यालययोः विलयीकरणं निरस्तम्



हिमसंस्कृतवार्ताः — शिमला । हिमाचलप्रदेशसर्वकारेण मण्डीमण्डलस्य द्वयोः सर्वकारीय-स्नातक-महाविद्यालययोः (डिग्री कॉलेजों के) विलयस्य/युक्तिकरणस्य स्वकीयः पूर्वतनः आदेशः सद्यःप्रभावेण निरस्तीकृतः। अस्मिन् सन्दर्भे उच्चशिक्षाविभागेन अधिसूचना प्रसारिता अस्ति। एतस्मात् पूर्वं, एतेषां महाविद्यालयानां विलयस्य आदेशः २ जून् २०२६ तमवर्षस्य दिनाङ्के कृतः आसीत्।
येषां महाविद्यालयानां विलयस्य आदेशाः निरस्ताः कृताः, तेषु मण्डीमण्डलस्य 'आर्यभट्ट सर्वकारीय-स्नातक-महाविद्यालयः संधोल:' इति सम्मिलितः अस्ति। द्वितीयः सर्वकारीय-स्नातक-महाविद्यालयः 'कोटली' इति वर्तते। उच्चशिक्षाविभागेन स्वकीयायां २ जून् २०२६ तमवर्षस्य अधिसूचनायाम् आंशिकं संशोधनं विहितम्। अयं आदेशः सद्यःप्रभावेण प्रवृत्तः जातः अस्ति।

# तकनीकी-शिक्षा-मण्डलेन अस्य वित्तवर्षस्य कृते १४ कोटिरूप्यकाणाम् आयव्ययकं पारितम्



हिमसंस्कृतवार्ताः — शिमला ।हिमाचलप्रदेश-तकनीकी-शिक्षा-विभागस्य सचिवस्य डॉ. अभिषेकजैनस्य अध्यक्षतायाम् अत्र हिमाचलप्रदेश-तकनीकी-शिक्षा-मण्डलस्य (बोर्ड) ६१ तमम् उपवेशनं आयोजितम्। उपवेशने मण्डलस्य वर्ष २०२६-२७ इत्यस्य कृते प्रायः १४ कोटिरूप्यकाणाम् आयव्ययकं पारितं जातं तथा च विविधेषु विषयेषु गहनविमर्शः कृतः। गोष्ठ्यां वर्ष २०२५-२६ अवधौ मण्डलेन कृतानां कार्याणां समीक्षा अपि विहिता।
डॉ. अभिषेकजैनः मण्डलेन सञ्चाल्यमानासु परीक्षासु उच्चगुणवत्तां स्थापयितुं निर्देशान् दत्तवान्। सः मण्डलाय देशस्य विभिन्नानां प्रदेशानां शैक्षणिकमण्डलानां कार्यप्रणालीं द्रष्टुं, अवगन्तुं तथा च तेषाम् उत्तमाः तकनीकीः अङ्गीकर्तुं दिशा निर्देशान् प्रसारितवान्, येन मण्डलेन सञ्चाल्यमानासु परीक्षासु उच्चगुणवत्ता सुस्थिरा भवेत्। उपवेशने सचिवाय निर्देशः दत्तः यत् तकनीकी-शिक्षा-मण्डलेन प्रदीयमानः प्रपत्रोपाधिः (डिप्लोमा) द्वादशी-कक्षायाः विज्ञानसङ्कायस्य समकक्षीकर्तुं उचितानि पदक्षेपाणि उत्थाप्यन्ताम्। मण्डलेन एतदपि निर्णीतं यत् वर्ष २०२० तः परं भेषज-शास्त्रे (फार्मेसी) प्रपत्रोपाधि कुर्वतां कृते 'पी.सी.आई.' (PCI) इत्यस्य संशोधित-अधिसूचनानुसारं प्रपत्रोपाधिः प्रदास्यते। सः मण्डलस्य अधिकारिभ्यः समये समये विभिन्नानां बहु-तकनीकी-संस्थानां (पॉलीटेक्निक) अन्यासां च सम्बद्धानां संस्थानां निरीक्षणं कर्तुं तथा च निरीक्षणकाले प्राप्तानां त्रुटीनां समयबद्धं निवारणं कर्तुमपि निर्देशान् अददत्।
डॉ. अभिषेकजैनः तकनीकी-शिक्षा-विभागस्य अधिकारिभ्यः प्रदेशे पाठ्यमानानां बहु-तकनीकी-संस्थानां पाठ्यक्रमं समये समये संशोधितं कर्तुं तथा च नवीनान् विषयान् पाठ्यक्रमे समावेष्टुं निर्देशान् प्रसारितवान्। अस्मिन् उपवेशने धर्मपुर-विधानसभाक्षेत्रस्य विधायकः चन्द्रशेखरः समेताः विभिन्नानां विभागानां वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे द्वादशस्य अन्तर्राष्ट्रिय- योगमहोत्सवस्य आयोजनम्







**हिमसंस्कृतवार्ताः-** आशुतोष पाण्डेयः, देवघरः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे आयोजिते द्वादशेऽन्तर्राष्ट्रिय- योगमहोत्सवे एकादशपरिसराणां, सप्त- आदर्श- संस्कृत- महाविद्यालयानां प्रतिभागिनो भागग्रहणमकुर्वन्। तस्मिन् महोत्सवे झारखण्डराज्यान्तर्गतस्य देवघरनगरस्थस्य लक्ष्मीदेवीशराफा- आदर्श- संस्कृत- महाविद्यालयस्य पञ्चच्छात्रा भागमगृह्णन्। ते च पञ्चच्छात्राः पाण्डेयाशुतोषः, पाण्डेयगोपालः, पाण्डेयकुन्दनकुमारः, पाण्डेयनिशुकान्तः, तिवारिसुबलकुमारश्चात्र प्रतिभागिनोऽभवन्। षड्विंशत्यधिकद्विसहस्रतमे कृष्टाब्दे षष्ठमासस्य विंशतितमे दिनाङ्के सम्पन्नायाम् एकलयोगप्रतियोगितायां लक्ष्मीदेवीशराफा- आदर्श- संस्कृत- महाविद्यालयात् आगतेषु पञ्चसु छात्रेषु छात्रः पाण्डेयनिशुकान्त उत्तमं प्रदर्शनमकरोत्। योगप्रतियोगिताया अनन्तरं रङ्गवल्लीप्रतियोगिता योगसूत्र- कण्ठपाठ- प्रतियोगिता, सामूहिकयोगप्रतियोगिता चेत्यन्याः प्रतियोगिता अप्यभवन्।

तदनन्तरमेकविंशतितमे दिनाङ्के सर्वे प्रतिभागिनोऽन्तर्जालमाध्यमेन केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतेः श्रीनिवासवरखेडीवर्यस्यय आशीर्वचनमशृण्वन्। आशीर्वचनानन्तरं योगाभ्यासो वाद्यवृन्दप्रस्तुतिश्चाभवताम्। तत्र हरिप्रसादपौडियालस्य वंशीवादनं श्रुत्वा सर्वे जना मन्त्रमुग्धा अभवन्। ततः परं डॉ द्विवेदिसञ्जयस्तस्य सहयोगिनश्च मधुरां सङ्गीतप्रस्तुतिमकुर्वन्। महोत्सवस्य समापनकार्यक्रमे बहवोऽतिथय आचार्या आचार्याश्च निर्देशकाः संयोजकाः कार्यकर्तारः कार्यकर्त्र्यश्च भागमगृह्णन्॥

# डी.पी.एस. बोकारो ( DPS , BOKARO )विद्यालयस्य आदित्य मिश्रः पुनर्मूल्याङ्कनानन्तरं सी.बी.एस.ई. एस.एस.सी.ई. २०२६ परीक्षायां संयुक्तरूपेण राष्ट्रीय-शीर्षस्थानं प्राप्तवान्



**हिमसंस्कृतवार्ता- सौरभः दे।** दिल्ली पब्लिक स्कूल (डी.पी.एस.) बोकारो विद्यालयस्य छात्रैः सी.बी.एस.ई. बोर्ड- परीक्षायां २०२६ मध्ये उत्कृष्टं प्रदर्शनं कृत्वा इतिहासः रचितः। विद्यालयस्य मेधावी छात्रः आदित्य मिश्रः अधुना विज्ञान-वर्गे एस.एस.सी.ई. २०२६ परीक्षायां संयुक्तरूपेण राष्ट्रीय-शीर्षस्थानं प्राप्तवान्।पूर्वं झारखण्ड-राज्यस्य विज्ञान-विषये प्रथमस्थानं प्राप्तवान् आदित्यः पुनर्मूल्याङ्कनानन्तरं स्वस्य प्राप्ताङ्कं ९९.२० प्रतिशततः ९९.६० प्रतिशतं यावत् वर्धितवान्। २०२६ तमस्य वर्षस्य मई-मासस्य १३ दिनाङ्के परिणाम-घोषणायां आदित्यः जीवविज्ञान-विषये प्राप्ताङ्कैः सन्तुष्टः नासीत्। अतः सः सी.बी.एस.ई. संस्थायै पुनर्मूल्याङ्कनार्थं आवेदनं कृतवान्। तस्य परिणामः अनुकूलः अभवत्। जीवविज्ञान-विषये तस्य प्राप्ताङ्कः ९६ तः ९९ पर्यन्तं अभवत्। अधुना सः कानपुर-नगरस्य सोनाक्षी गोयल इत्यनया सह विज्ञान-वर्गे संयुक्तरूपेण राष्ट्रीय-शीर्षस्थानं प्राप्तवान्। उभयोः समग्रः प्राप्ताङ्कः ९९.६० प्रतिशतं अस्ति।विशेषतया आदित्येन आङ्ग्ल-भाषा, रसायनशास्त्र तथा चित्रकला-विषये पूर्णाङ्काः प्राप्ताः। भौतिकशास्त्रे सः ९९ अङ्कान् प्राप्तवान्। अन्येषु सर्वेषु विषयेषु सः ए-१ श्रेणीं प्राप्तवान्।तस्य ऐतिहासिक-सफलतया विद्यालय-परिवारः अत्यन्तं प्रसन्नः अभवत्। प्राचार्यः डॉ. ए. एस. गंगवार महोदयः आदित्यं तस्य पिता प्रजेशचन्द्र मिश्रं च सम्मानितवान्।डॉ. गंगवार महोदयः अवदत् यत् आदित्यस्य उपलब्धिः न केवलं विद्यालयस्य, अपितु सम्पूर्णस्य बोकारो नगरस्य, झारखण्ड-राज्यस्य तथा राष्ट्रस्य गौरवस्य विषयः अस्ति। सः अपि उक्तवान् यत् आदित्यः प्रारम्भकालादेव नियमितः, प्रतिभाशाली तथा परिश्रमी छात्रः आसीत्। स्वस्य प्रतिभया, समर्पणेन एवं कठोरपरिश्रमेण सः विद्यालयस्य कीर्तिध्वजं राष्ट्रीय-स्तरे उच्चैः स्थापितवान्।

## संस्कृतं मधुरं सदा- ५१

भगवत्स्वरूपम् अतुलनीयम् अवर्णनीयं च। तथैव भगवता सृष्टं जगदपि विचित्रम्, अकथनीयं च वर्तते। पुरुष-प्रकृत्योः रङ्गमञ्चवत् सृष्टिरियम्। यत्र च अनेकेषां जीवप्राणिनाम् आधारस्वरूपं, गनागमनस्थलं, क्रीडाप्राङ्गणं च वर्तते जगदिदम्। जन्ममरणसुखदुःखादिकन्तु जीवनेन सह ओतःप्रोततया संलग्नं वर्तते। तथापि एकेन इतरैः सह कथं व्यवहर्तव्यम् इतिविषये अत्र किञ्चिद् दिग्दर्शनं कर्तुमुत्सहे। योऽहम्, अपरः सोऽपि मादृश एव। मयि स्थितः सुखदुःखादिभावो यथा, तथैव तस्मिन्नपि स भावः समान एव। एतादृशो भाव आत्मौपम्यभावः कथ्यते। जगति प्रत्येकं जनानां सुखं, दुःखं, लाभः, हानिः, जयः, पराजयः, रोगः, आरोग्य इत्यादिभ्यः प्राप्तः अन्तःकरणस्थः अनुभवः समानो भवति । परेषां सुखदुःखादिकं यः आत्मनि अनुभवति स सत्पुरुषः कथ्यते। वस्तुतः स हि महात्मा आख्यायते, यः समस्तब्रह्माण्डे स्वकीयम् आत्मानं व्यापकं पश्यति। परन्तु एकदेशीयम्, अथवा शरीरे हि आत्मानं सीमिततया यः पश्यति स न महात्मा, अपि तु अल्पात्मा उच्यते। एतादृशः अल्पात्मा पुरुषः, महात्मा इव समस्तप्राणिषु स्थितं सुखदुःखादिकम् अनुभवितुं न शक्नुयात्। तस्मिन् सहानुभूतिः, समवेदना इत्यादीनां महतां गुणानां नितराम् अभावः परिलक्ष्यते। समदर्शि-महापुरुषस्य विषये भगवता गीतायां प्रोक्तं यत्-'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।।' इति। इयं समदर्शितायाः स्थितिः, अथवा समतायाः अनुभवो भगवत्कृपातो हि सम्भवति। एतादृशस्य समभावस्य प्राप्त्यर्थं भगवत्स्मरणपूर्वकं सुदृढा साधना समाचरणीया। भक्तिसिद्धान्तानुसारम्- यदि अखिलसंसारं हि भगवत्स्वरूपं मत्वा जगतः सततं हितसेवा आचर्यते, तदापि शनैः अन्तःकरणे समताभावस्य जागरणं सम्भवति। गोस्वामी तुलसीदासो न्यगदत्-

'सो अनन्य जाके असि मति न टरै हनुमंत।
मैं सेवक
सचराचर रूप
स्वामी भगवंत।।



हिमसंस्कृतवार्ता
✍असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

## "लौकिकन्यायकोशः"
## "उदकनिमज्जनन्यायः"

जलपानेन मनुष्यस्य पिपासा शाम्यति। परं तत् यावत् आवश्यकं तावदेव पिबेत् चेत्। अधिकं जलम् अस्ति इति कूपे वा तडागे वा यदि सः उन्मज्जेत् तर्हि तस्य दुःखस्य अन्तः न भवति। कस्यापि वस्तुनः योग्येन आस्वादनेन मनुजस्य आनन्दः भवति। अतिमात्रेण भोगेन अन्ते दुःखम् एव भवति इति अनेन सूच्यते।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

## पितृछायायां जीवनस्य सौन्दर्यम् !!!

पिता स्वर्गः पिता धर्मः पिता हि परमं तपः।
पितरि प्रीतिमापन्ने सर्वाः प्रीयन्ते देवताः॥

पिता परिवारस्य आधारस्तम्भः भवति। सः स्वसन्तानानां पालनपोषणं, शिक्षणं तथा संरक्षणं च करोति। पितुः जीवनं त्यागेन, परिश्रमेण तथा उत्तरदायित्वेन परिपूर्णं भवति। सः स्वसुखं त्यक्त्वा परिवारस्य सुखाय अहर्निशं प्रयतते। पिता सन्तानानां प्रथमः गुरुर्भवति। सः जीवनस्य सन्मार्गं दर्शयति तथा नैतिकमूल्यानि शिक्षयति।

पितुः प्रेम बहुधा मौनरूपेण दृश्यते, किन्तु तस्य हृदये सन्तानानां प्रति अनन्तं स्नेहं वर्तते। संकटसमये पिता साहसं ददाति, दुःखसमये सान्त्वनां ददाति, सफलतायां प्रोत्साहनं च ददाति। तस्य अनुभवः सन्तानानां जीवने अमूल्यः निधिः भवति।

समाजस्य निर्माणे अपि पितुः महत्त्वपूर्णा भूमिका अस्ति। सुशिक्षिताः, सुसंस्कृताश्च सन्तानाः राष्ट्रस्य उन्नतिं कुर्वन्ति, तेषां निर्माणे पितुः योगदानम् अतुलनीयम् अस्ति। अतः सर्वैः पितुः सम्मानः कर्तव्यः। पितुः सेवया, आज्ञापालनेन, प्रेम्णा च तस्य ऋणं किञ्चिदपि परिहर्तुं शक्यते।

वास्तवतः पिता केवलं परिवारस्य पालकः न, अपितु प्रेरणास्रोतः, मार्गदर्शकः तथा जीवनस्य महान् आदर्शः अपि अस्ति। अतः अस्माभिः प्रतिदिनं पितुः सम्मानः कर्तव्यः, न केवलं पितृदिवसे।॥



**-पण्डित दीपक शास्त्री हरियाणा**